**दिनाङ्क :- 28.06.2024** **सायम् - 06:20**

**इयम् आकाशवाणी**
**सम्प्रति वार्ता:- श्रूयन्ताम्**
**प्रवाचकः – नरेन्द्रदत्तसेमवालः**

## आदौ-मुख्यवार्ता:

- नीट्-परीक्षाप्रकरणमधिकृत्य द्वयोरेव सदनयोः कार्याचरणं बाधितं जातम् । लोकसभा अद्य पूर्णदिवसाय स्थगिता जाता ।
- झारखण्ड-उच्च-न्यायालयः अद्य हेमंत-सोरेनाय भूमि-प्रवञ्चनप्रकरणेन सम्पृक्ते धनशोधन-प्रकरणे कारवासात् मुक्तिं प्रायच्छत् ।
- राष्ट्रीय-राजधान्यां दिल्ल्यां वृष्टिकारणेन अनेकानि स्थलानि जलाधिक्येन प्रपूरितानि जातानि ।
- महिलाक्रिकेटस्पर्धायाः प्रथमे दिने एम् ए चिदम्बरम-क्रिकेटक्रीडाङ्गणे भारत- साउथाफ्रीका इत्यनयोः मध्ये जायमाने क्रिकेटद्वन्द्वे भारतं चतस्रणां क्रीडिकानां हानौ पञ्चविंशत्यधिक-पञ्चशतं धावनाङ्कैः सह क्रीडति

## अथ वार्ता: विस्तरेण

### लोकसभाराज्यसभास्थगनम्

नीट्-परीक्षायां कथितानियमितातायाः विषये विपक्षिदलानां विरोधस्य कारणेन अद्य लोकसभा आदिवसं स्थगिता जाता । राज्यसभा अपि त्रिवारं स्थगिता जाता । प्रथम-स्थगनस्य अनन्तरं यदा मध्याह्ने द्वादश-वादने लोकसभायाः कार्याचरणं समारब्धं तदा काङ्ग्रेसदलस्य सदस्याः अस्मिन् विषये शिक्षामन्त्रिणः धर्मेन्द्रप्रधानस्य त्यागपत्रस्य याचनं कुर्वन्तः उच्चैः उद्घोषितुम् आरब्धवन्तः। काँग्रेस्, द्रविडा मुनेत्र कड़गम-डीएमके, तृणमूल कांग्रेस- टीएमसी, समाजवादी पार्टी चेत्यादिदानां सांसदाः सदनमध्ये समागतवन्तः । लोकसभायाः अध्यक्षः ओम बिरला इत्यनेन उक्तं यत् अस्य विषयस्य विचारार्थं एका समितिः निर्मिता अस्ति। सः अवदत् यत् राष्ट्रपत्याभिभाषणस्य धन्यवादप्रस्तावे चर्चायाः समये सदस्याः एतत् विषयं उत्थापयितुं शक्नुवन्ति। नीट् विषये विपक्षस्य चर्चायाः आग्रहं अङ्गीकृत्य संसदीयकार्याणां मन्त्री किरेन् रिजिजुः उक्तवान् यत् यस्मिन् काले राष्ट्रपतिनः धन्यवादभाषणं संसदस्य द्वयोः सदनयोः संयुक्तसभायां पूर्वनिर्धारितं भवति तस्मिन् काले किमपि चर्चितुम् आज्ञाप्रदानस्य परम्परा न अस्ति ।

NEET विषये राज्यसभायां अपि कोलाहलः अभवत्। प्रथम-स्थगनस्य अनन्तरं यदा मध्याह्ने १२ वादने सदनकार्याचरणं पुनः समारब्धम् अभवत् तदा पुनः काङ्ग्रेस, टीएमसी, डीएमके, आम आदमी पार्टी चेत्यादीनि विपक्षदलानि पुनः नीट् विषये सर्वकारस्य विरुद्धं उच्चैर्घोषं कर्तुम् प्रारभन् । राष्ट्रपतिसम्बोधने धन्यवादप्रस्तावस्य विषये चर्चां निरन्तरं कुर्वन् भाजपा सांसद सुधांशु त्रिवेदी सर्वकारस्य उपलब्धीनां प्रकाशनं कृतवान्। पूर्वप्रधानमन्त्री, जेडीएस-नेता च एच्.डी.देवगौडा इत्यनेन उक्तं यत् अन्वेषणं विना उत्तरदायित्वं निर्धारयितुं न शक्यते। सः अवदत् यत् सर्वकारेण केन्द्रीय-अन्वेषण-विभागाय अनुसन्धानस्य आदेशः पूर्वमेव प्रदत्तः अस्ति, अतः सर्वैः प्रतिवेदनस्य प्रतीक्षा कर्तव्या।

### हेमन्तसोरेनः

झारखण्ड-उच्च-न्यायालयः अद्य राज्यस्य पूर्व-मुख्यमंत्रिणे हेमंत-सोरेनाय भूमि-प्रवञ्चनप्रकरणेन सम्पृक्ते धनशोधन-प्रकरणे कारवासात् मुक्तिं प्रायच्छत् । झारखंड-मुक्ति मोर्चा इत्यस्य कार्यकारी-अध्यक्षः सोरेनः प्रवर्तन-निदेशालयेन धनशोधनप्रकरणे अन्वीक्षणाय अस्य वर्षस्य जनवर्याः एकत्रिंशद्दिनाङ्के निगडितः आसीत् ।अष्टचत्वारिंशत्-वर्षीयः सोरेनः अस्मिन् समये रांचीनगरस्य बिरसामुंडा-करावासे बन्धकः अस्ति । उच्च-न्यायालयेन सोरेनस्य बन्धनमुक्तियाचिककाम् अधिकृत्य स्वकीयः निर्णयः जूनमासस्य त्रयोदशदिनाङ्के सुरक्षितः कृतः आसीत् ।

**दिल्ली-वृष्टिः**

राष्ट्रीय-राजधान्यां दिल्ल्यां गुरुवासरस्य रात्र्यारभ्य प्रवर्तमानेन वृष्टिकारणेन अनेकानि स्थलानि जलाधिक्येन प्रपूरितानि जातानि । ऋतुविज्ञानविभागः प्रोक्तवान् यत् , विगतासु चतुर्विंशतिहोरासु दिल्ल्यां अष्टिंशत्यधिक-द्विशतं मिमीटरपरिमिता वृष्टिः सञ्जाता । विगतासु चतुर्विंशति होरासु एव सामान्यतः त्रिगुणित-वष्टिपातेन जनाः कष्टपीडिताः अभवन् । यद्यपि जनाः द्विमासाद् प्रविर्तितेन भीषणातपेन पीडिताः सन्ति यस्मात् विमुच्य ते अधुना आनन्दम् अन्वभवन् । शुक्रवासरे दिल्ल्यां न्यूनतम-तपमानं चतुर्विंशति-दशमलव-सप्त-डिग्री-सेल्सियस् इति संसूचितं यत् सामान्यतः त्रि-दशमलव-द्वे-डिग्री-सेल्सियस्-मितं न्यूनम् अस्ति । राष्ट्रियराजधान्यां विगतेषु पञ्चदशवर्षेषु कदाप्यपि सम्पूर्णे जूनमासे द्विशतं मिमी-परिमितं वृष्टिपातं नाभवत् । दिल्ल्याः राज्यपालः वी.के सक्सेना अद्य दिल्ल्यां जलप्लावस्य स्थितिं समीक्षितुं सर्वैः अभिकरणैः सह तात्कालिकोपवेशनम् अकरोत् । अस्मिन् उपवेशने दिल्ली-जलप्राधिकरणम्, सिञ्चनविभागः , खाद्यविभागः , दिल्लीनगरनिगमः , दिल्ल्यारक्षिबलम् , दिल्लीविकारप्राधिकरणम् , राष्ट्रियापद्विमोचनबलम् चेत्यादयः उपस्थिताः सन्ति ।

**प्रधानमन्त्री-नरसिम्हारावः**

प्रधानमन्त्री नरेन्द्र मोदी अद्य पूर्वप्रधानमन्त्रिणः पी.वी. नरसिंहराव इत्यस्य जयन्त्यावसरे तस्मै श्रद्धाञ्जलिं प्रदत्तवन् । सार्वजनिक-संदेशपटले श्रीमोदी अवदत् यत् पी.वी. नरसिम्हारववर्यः तस्य नेतृत्व-बुद्धिमते अधिकृत्य संस्मरिष्यते । प्रधानमन्त्रिणा उक्तं यत् मरणोपरान्त देशसेवायै तस्मै अस्य वर्षस्य प्रारम्भे भारतरत्नेति पुरस्कारेण सम्मानितं कुर्वन् भारत-सर्वकारः गौरवम् अनुभवति ।

**अमरनाथयात्रा**

जम्म्वाः आधार-शिविरात् अद्य प्रातः प्रवर्तमानं अमरनाथ-तीर्थयात्रिणां प्रथमदलं अद्य अपराह्णे सुदृढ-सुरक्षायाः मध्ये कश्मीरे प्रवेशम् अकरोत् । तीर्थ-यात्रिणां कुलगाम-क्षेत्रस्य जनपदाधिकारिः राज्य-प्रशासनाधिकारिणः, पर्यटन-विभागाधिकारिणः च स्वागतम् अकुर्वन् ।अस्य वर्षस्य अमरनाथयात्रा श्वः बालताल-चंदनवाडी-मार्गयोः समारप्स्यते । उपराज्यपालः मनोज -सिन्हा अद्य प्रातः बम-बम-भोले , जय-भोलेनाथ चेत्यादिभिः उद्घोषैः सह वार्षिक-अमरनाथ-यात्रायाः समारम्भम् अकरोत् । तीर्थ-यात्रिषु देशस्य विभिन्न-भागानां जनाः सम्मिलिताः सन्ति । अस्मिन् दले त्र्यधिक-षट्शतोत्तर-चतुस्सहस्रं तीर्थयात्रिणः सन्ति येषु द्वात्रिंशदुत्तर-षट्-शताधिक-त्रिसहस्रं पुरुषाः , एकादशोत्तर-एकादशशतं महिलाः , नव बालकाः,सप्तत्रिंशदधिक-द्विशतं साधवः च सम्मिलिताः सन्ति ।

**राज्यसभा**

राष्ट्रपतिद्रौपदी-मुर्मूवर्यायाः अभिभाषणे धन्यवादप्रस्तावस्य विषये चर्चा अद्य राज्यसभायां नीट्-प्रकरणे विपक्षस्य कोलाहलस्य मध्ये समारब्धा। चर्चायै एकविंशतिहोरायाः समयः एव निर्धारितः आसीत्। चर्चायाः आरम्भं कुर्वन् भाजपादलस्य सांसदः सुधांशु त्रिवेदी विगत-दशवर्षेषु नरेन्द्रमोदी-सर्वकारस्य सफलतायाः उल्लेखं कृतवान्। सद्यः समाप्तस्य लोकसभानिर्वाचनस्य विषये सः अवदत् यत् दक्षिणराज्येषु एनडीए-पक्षस्य मतभागः काङ्ग्रेसपक्षस्य अपेक्षया अधिकः अस्ति। त्रिवेदीमहोदयः अवदत् यत् काङ्ग्रेसदलं तृतीयप्रयासे अपि लोकसभायां बहुमतं प्राप्तुं असफलम् अभवत्। सः अवदत् यत् भारतं ब्रिटेनं परित्यज्य विश्वस्य तृतीया बृहत्तमा अर्थव्यवस्था जाता । श्री त्रिवेदी इत्यनेन उक्तं यत् एनडीए-सर्वकारेण चतुस्त्रिंशत्-कोटि-एलईडी-गोलदीपाः वितरिताः सन्ति सहैव नवीकरणीय-ऊर्जायाः दिशि गन्तुं सर्वकारः प्रतिबद्धः अस्ति। चर्चायां भाजपादलस्य सांसदः राकेशसिन्हा, भीमसिंहः, वाईएसआर् काँग्रेसदलस्य सांसदः गोला-बाबूराव चेत्यादयः सदस्याः अपि भागं गृहीतवन्तः।

**धर्मेन्द्रप्रधानः**

शिक्षा-मन्त्री धर्मेंद्र-प्रधानः अद्य नीट्-परीक्षार्थिभ्यः आश्वासनम् प्रायच्छत् यत् अपराधिणः विरुध्य कठोरतमं कार्याचरणं करिष्यते। संसदः बहिः पत्रकारान् सम्बोधयत् सः प्रोक्तवान् यत् सर्वकारः अस्मिन् विषये संवेदनशीलः अस्त । श्रीप्रधानः विद्यार्थिभ्यः अभिभावकेभ्यः च आश्वासनं प्रायच्छत् यत् सर्वमपि आवश्यकं कार्याचरणं विधास्यते । सः प्रोक्तवान् यत् सर्वकारः सदने कस्मिन्नपि प्रकरणे चर्चायै तत्परः अस्ति।

**नवीनविधेयकानि**

भारतीय-न्याय-संहिता 2023, भारतीय-नागरिक-सुरक्षा-संहिता 2023, भारतीय--साक्ष्य-अधिनियम 2023 इत्यादीनि त्रीणि नूतन-अपराध-विधेयकानि अग्रिमसासस्य एकदिनाङ्कात् क्रियान्वितानि भविष्यन्ति । एतनि विधेयकानि विगतवर्षे संसदः शीतकालीन-सत्रावधौ पारितानि कृतानि अभवन् । नवीनापराधविधेयकानि भारतीय-नागरिकान् सशक्तं कर्तुं सकारात्मकदिशि महत्वपूर्णं पदक्षेपम् अस्ति। नवाशात्यधिक-नवदशतमाब्दस्य समूहस्य भारतीय-विदेश-सेवायाः आईएफएस अधिकारी विक्रममिस्री इत्यसौ अग्रिम-विदेशसचिवत्वेन नियुक्तः कृतः अस्ति । सः विनय-मोहन-क्वात्रा इत्यस्य स्थानं स्वीकरिष्यति यस्य कार्यकालः आगामिमासस्य चतुर्दशदिनाङ्के समाप्यते । श्री मिस्री वर्तमानसमये राष्ट्रिय-सुरक्षा-परिषद-सचिवालये उप-राष्ट्रिय-सुरक्षा-परामर्शदः इति रूपेण कार्यरतः अस्ति।

**महलाक्रिकेटस्पर्धा**

महिलाक्रिकेटस्पर्धायाः प्रथमे दिने एम् ए चिदम्बरम-क्रिकेटक्रीडाङ्गणे भारत- साउथाफ्रीका इत्यनयोः मध्ये जायमाने क्रिकेटद्वन्द्वे भारतं चतस्रणां क्रीडिकानां हानौ पञ्चविंशत्यधिक-पञ्चशतं धावनाङ्कैः सह क्रीडति।

**।। इति वार्ताः ।।**